# २६. पादुका सहस्रम् - यन्त्रिका पद्धतिः (१०)

उदग्र यन्त्रिकां वन्दे पादुकां यन्निवेशनात् ।
उपर्यपि पदं विष्णोः प्रत्यादिष्ट प्रसाधनम् ॥ २६.१॥ ८०१॥

प्रसभं प्रतिरुध्य कण्टकादीन्
भवती शौरि पदाम्बुजा दधस्तात् ।
चराणावनि धारयत्य मुष्मिन्
उचितच्छाय मुपर्यपि प्रतीकम् ॥ २६.२॥ ८०२॥

मुरभिन् मणिपादुके त्वदीयां
अनघा मङ्गुलि यन्त्रिका मवैमि ।
स्वय मुन्नमितां प्रदेशिनीं ते
परमं दैवत मेकमित्यृचन्तीम् ॥ २६.३॥ ८०३॥

स्वदते मणिपादुके त्वदीया पदशाखा युग यन्त्रिका विचित्रा ।
परमं पुरुषं प्रकाशयन्ती प्रणवस्येव परेय मर्धमात्रा ॥ २६.४॥ ८०४॥

अनुयात मनोरथा मुरारे र्भवती केलिरथश्रियं दधाति ।
चरणावनि यन्त्रिका तवैषा तनुते कूबर सम्पदं पुरस्तात् ॥ २६.५॥ ८०५॥

शङ्के भवत्याः सुभगं प्रतीकं रङ्गेश पादाङ्गुलि सङ्ग्रहार्थम् ।

त्राणाय पादावनि विष्टपाना माज्ञाकरी मङ्गुलि मुद्रिकां ते ॥ २६.६॥८०६॥

अलङ्कृतं कर्णिकयो परिष्टात्
    उदग्रनालं तव यन्त्रिकांशम् ।
पद्मापतेः पादसरोज लक्ष्म्याः
    प्रत्येमि पादावनि केलिपद्मम् ॥ २६.७॥ ८०७॥

उपरि विनिहितस्य केशवाङ्घ्रेः
    उपरि पदावनि यन्त्रिकात्मिका त्वम् ।
इति तव महिमा लघू करोति
    प्रणत सुरेश्वर शेखराधिरोहम् ॥ २६.८॥ ८०८॥

नित्यं पदावनि निबद्ध किरीट शोभं
    पद्मालया परिचितं पद मुद्वहन्त्याः ।
अङ्गीकरोति रुचि मङ्गुलि यन्त्रिका ते
    साम्राज्य सम्प दनुरूप मिवातपत्रम् ॥ २६.९॥ ८०९॥

प्रथमा कलेव भवती चरणावनि भाति रङ्गचन्द्रमसः ।
शृङ्गोन्नतिरिव यत्र श्रियं विभावयति यन्त्रिका योगः ॥ २६.१०॥ ८१०॥

इति कवितार्किक सिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे

यन्त्रिका पद्धतिः षड्विंशी ॥